(२. ४. ६४/११०८) इति लुक्, तेनात्र बहुत्वमाश्रीयत एव । शैतिकाक्षपाञ्चालेयाः । शितिकाक्षो नाम ऋषिः, तस्यापत्यम् इति ऋष्यण्, तदपत्ये यूनि [1]य इञ् तस्य 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२. ४. ५८/१२७६) इति लुक् । पाञ्चालस्यापत्यं स्त्री पाञ्चाली, तदपत्यं युवा पाञ्चालेयः । अत्रापि बहुवचनमविवक्षितम् इति शैतिकाक्षपाञ्चालेयौ इत्यत्रापि भवति । कटुकवार्चलेयाः । कटुकस्य अपत्यम् इति 'अत इञ्' (४. १. ९५/१०९५), तस्य 'बह्वच इञः प्राच्यभरतेषु' (२. ४. ६६/११४८) इति बहुषु लुक् । वर्चलायाः अपत्यं वार्चलेयः । शाकलशुनकाः । शकलस्यापत्यं शाकल्यः, तस्य छात्राः शाकलाः । 'कण्वादिभ्यो गोत्रे' (४. २. १११/१३३२) इत्यण् । शुनकस्यापत्यम् इति बिदादिभ्योऽञ् (४. १. १०४/११०६), तस्य बहुषु लुक् । शाकलशणकाः इति केचित् पठन्ति । तेषां शणकशब्दादुत्पन्नस्य इञः 'बह्वच इञः प्राच्यभरतेषु' (२. ४. ६६/११४८) इति बहुषु लुक् । शुनकधात्रेयाः । [2]धात्र्या अपत्यं धात्रेयः । शणकबाभ्रवाः । बभ्रोरपत्यं बाभ्रवः । आर्चाभिमौद्गलाः । ऋचाभेन प्रोक्तमधीयते आर्चाभिनः[3] । वैशम्पायनान्तेवासित्वात् णिनिः । मुद्गलः[4] कण्वादिः, तदपत्यस्य छात्रा मौद्गलाः । कुन्तिसुराष्ट्राः । कुन्तेः सुराष्ट्रस्य चापत्येषु बहुषु तन्निवासे वा जनपदे द्वन्द्वोऽयम् । [5]कुन्तिचिन्तिशब्दौ अन्तोदात्तौ । चिन्तिसुराष्ट्राः कुन्तिसुराष्ट्रवत् । तण्डवतण्डाः । पचाद्यच्प्रत्ययान्तौ अन्तोदात्तौ एतौ गर्गादिषु पठ्येते । तत्रापत्यबहुत्वे यञो लुक् क्रियते । [6]गर्गवत्साः । अत्रापि अपत्यबहुत्वे यञो लुक् । अविमत्तकामविद्धाः । अविमत्तशब्दो नञ्स्वरेणाद्युदात्तः । द्वयोरप्येतयोः अपत्येषु बहुषु इञः 'बह्वच इञः प्राच्य–भरतेषु' (२. ४. ६६/११४८) इति लुक् क्रियते । बाभ्रवशालङ्कायनाः । बभ्रोरपत्यं बाभ्रवः । [7]शलङ्कु शलङ्कं च इति शालङ्कायनः । बाभ्रवदानच्युताः । दानच्युतशब्दात् इञः बह्वचः (२ ४. ६६/११४८) इति लुक् । कठकालापाः । कठेन प्रोक्तमधीयते कठाः, वैशम्पायनान्तेवासित्वात् णिनिः, तस्य कठचरकाल्लुक् (४. ३. १०७/१४८७) । कलापिना प्रोक्तमधीयते [8]कालापाः । 'कलापिनोऽण्' (४. ३. १०८/१४८८) इत्यण् प्रत्ययः, तस्मिन् 'इनण्यनपत्ये' (६. ४. १६४/१२४५) इति प्रकृतिभावे प्राप्ते नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पि (वा. ४६९) इत्यादिनोपसङ्ख्यानेन टिलोपः । कठकौथुमाः । कुथुमिना प्रोक्तमधीयते इति 'प्राग्दीव्यतोऽण्' (४. १ . ८३/१०७३), तस्य पूर्ववत् टिलोपः । कौथुमलौकाक्षाः । लोकाक्षेण प्रोक्तमधीयते लौकाक्षाः । लोकाक्षस्य वा अपत्यं लौकाक्षिः, तस्य छात्राः लौकाक्षाः । स्त्रीकुमारम् । स्त्रीशब्दोऽन्तोदात्तः । [9]मौदपैप्पलादाः । मुदस्यापत्यं मौदिः । तस्य छात्रा मौदाः । तथा पैप्पलादाः । मौदपैप्पलादाः इति द्विः पठ्यते, तस्य प्रयोजनं पक्षे समासान्तोदात्तत्वमेव यथा स्यादिति । [10]वत्सजरत् । वत्सश्च जरच्च च । वत्सशब्दोऽन्तोदात्तः । [11]सौश्रुतपार्थवाः । सुश्रुतस्य पृथोश्च छात्राः, 'प्राग्दीव्यतोऽण्' (४ . १. ८३/१०७३) । [12]जरामृत्यू । याज्यानुवाक्ये । यजेर्ण्यत्, 'यजयाचरुचप्रवचर्चश्च' (७. ३ . ६६/२८८२) इति [13]कुत्वाभावः । 'तित्स्वरितम्' (६. १. १८५/३७२९) इत्यन्तस्वरितः । अनुवाक्या इति वचेरनुपूर्वात् ण्यत् । आचार्योपसर्जनान्तेवासिनाम् इह पाठः प्रपञ्चार्थः ॥

---

1. इञन्तस्य क. 2. धात्र्याः अपत्यं नास्ति फ. 3. भवति इत्यधिकम् ग. 4. वा इत्यधिकम् क. 5. वाक्यमिदं नास्ति फ. ह. 6. उदाहरणमिदं नास्ति फ. 7. नडादिषु इत्यधिकम् ह. 8. इति इत्यधिकम् ङ. 9. मौदपैप्पलाः फ. 10. वत्सजरन्तः क, वत्सश्च जरन्तश्च इत्यधिकम् क, वत्सजरन्तम् ङ. 11. सौश्रुतपार्थिवाः क. 12. जरामृत्यु ब. 13. कुत्वाभावात् क.